Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 3 | ISSN : 2581- 6306

# संस्कृताध्येतृभ्यः औद्योगिकाः मार्गाः



खेमनारायण रेग्मी
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः, (नवदेहली)
गुरुवायूर् परिसरः

**शोधालेखसारः –** व्यावसायिकशिक्षया छात्राः उद्योगाभिप्रायपूर्णताप्तये प्रशिक्षिताः भवेयुः। उद्योगस्यावेदनापेक्षाः पूर्णङ्कर्तुं छात्रेभ्यो व्यावसायिकशिक्षाप्राप्तये प्रचोदयात्। भारते छात्राणामुत्तमाङ्कानाङ्कृते छात्रेभ्यः प्रोत्साहनं क्रियते, उत्तममहाविद्यालये प्रवेशः लभ्यते च। यदि वा व्यावसायिकशिक्षणं दद्यान्न दद्याद्वा। छात्रास्स्वहिताय जीवनसफलतायै चाग्रे वर्धनायावसरः लभ्यताम्।

**मुख्यशब्दः –** व्यावसायिकशिक्षा, संस्कृताध्येतारः, औद्योगिकमार्गाः ।

सामान्यस्नातकपदवीधरस्य अपेक्षया साधारणसंस्कृतस्नातकस्य कृते औद्योगिकाः मार्गाः विभिन्नाः अनेके च। यदि संस्कृते विशेषाध्ययनं चिकीर्षति तस्य कृते स्वस्य एव विषयस्य पाठने संशोधने च अपि च संस्कृतसम्बद्धक्षेत्रेषु इतरप्रकारेषु यथा भारतीयतत्त्वशास्त्रे, प्राचीनभारतेतिहासे, पुरातत्त्वशास्त्रे, प्राचीनलिपिशास्त्रेषु च सदवकाशाः बहवः। यदि कश्चन संस्कृतज्ञः संस्कृतिदृष्ट्या साहित्यदृष्ट्या वा परिणतः तर्हि सः लेखकरूपेण अथवा सांस्कृतिकसंस्थानां समायोजनेन सह स्वस्य उद्योगं प्राप्तुं शक्नोति । भारतीय प्रशासनिक सेवा अपि च अन्य केन्द्र लोकसेवा आयोगस्य बहुषु परीक्षासु संस्कृतम् एकः विषयः अस्ति। संस्कृतवित् स्नातकः कश्चन तादृशपरीक्षां स्वीकर्तुं शक्नोति। विशिष्य एतदवगतं यत् संस्कृतज्ञाः राष्ट्रस्तरे अपि च विदेशस्थ भारतीय रायभारकार्यालयेषु सांस्कृतिकप्रभारीरूपेण कार्यं कर्तुं योग्याः भवन्ति इति। यदि कश्चन साम्प्रदायिकः पण्डितः भवति तर्हि तस्मै न केवलं पाठशालासु अपि तु सामान्यशालासु, कलाशालासु, संशोधनविभागेषु च सर्वदा अवसराः सन्त्येव। येषां कृते शास्त्रज्ञानं सम्यक् अस्ति तेषां कृते विशिष्य विश्वविद्यालयीय संशोधनविभागेषु, संशोधनसंस्थासु, विशेषसंशोधनपरियोजनासु च आयोगेन निवेदनं कृतम्। अपि च आयोगेन पाठशालासु संशोधनविभागम् उद्घाटयितुम् अपि च संस्कृतविश्वविद्यालयानां स्थापनार्थम् अभ्यर्थितम् अस्ति। एतेषु सर्वेष्वपि क्षेत्रेषु पण्डितस्य उद्योगार्थम् अवसराः अनेके एव।

मठेषु, देवालयेषु, समुदायपरियोजनासु, राष्ट्रीयसविस्तारसेवासु च ये च पण्डिताः संस्कृतिविषये मौलिकविषयेषु वा अत्याकर्षकरूपेण प्रबोधयितुं समर्थाः तर्हि तादृशानां कृते उद्योगः सिद्ध एव। जैपुरे, संस्कृतकलाशालायां कस्यचन पण्डितस्य सांस्थिककार्येषु सम्यक् करोतु इति हेतोः सः इदानीं भारतसेवकसमाजस्य स्थानिकप्रमुखः अस्ति। पश्चिमबङ्गालस्य शिक्षामन्त्रालयः कादाचित्करूपेण भागवतस्य प्रवचनकर्तृभ्यः उद्योगावकाशं कल्पयति। अस्साम राज्ये कारागृहे विद्यामानेभ्यः मौलिकशिक्षणं प्रदातुं पण्डितेभ्यः अवकाशः प्रदीयते। ओडिश्शा राज्ये तावत् आयोगेन परिलक्षितं यत् कश्चित् युवा संस्कृतस्य पाठार्थम् अपि च संस्कृतसम्बद्धविषयाणां कृते पाठकरूपेण सः स्वयमेव उद्योगावकाशं कल्पितवान्। सः अवदत् यत् प्रतिकक्ष्यायाः कृते पञ्चाशत् मूल्यं स्वीकरोति अपि च सः इदानीम् अतीव प्रसिद्धः सञ्जातः। पुराणम् इतिहासं सम्यक् ज्ञातवद्भ्यः तु प्रस्तुते बहु अपेक्षा वर्तते। सम्यक् अधीतवत्सु जनेष भारतीयतत्त्वशास्त्राणां ग्रन्थानाम् अध्ययनं कर्तु इच्छा अधिका जायमाना अस्ति। वैयक्तिकरूपेण अथवा अध्ययनसमूहेषु पण्डितानां कृते पाठनव्यवस्था अत्यन्तं सुकरा एव।

यदि पण्डिताः वृत्तिपराः सन्ति तर्हि ते पुरोहितरूपेण, आयुर्वेदवैद्यरूपेण, ज्योतिषिरूपेण वा उद्योगावकाशः लभ्यते। ये च पाठशालायाम् कश्चित् कालम् अध्ययनं समाप्य अग्रे अध्येतुम् अशक्ताः ते संस्कृतमुद्रणालयेषु संस्कृतस्य मुद्रणकार्यं कर्तुं शक्नुयुः। संस्कृतस्य प्रूफ् रीडिंग् इत्यस्य चिकीर्षितुम् उन्नताध्ययनस्य अपेक्षा अस्त्येव । तालपत्राणां ग्रन्थालये अपि संस्कृतज्ञेभ्यः कार्यं कर्तुं सदवकाशः प्राप्यते एव।

पाठशालानां पुनरुज्जीवनम् अवश्यं भवेदेव। यतोहि पाठशालायाम् अध्ययनं समाप्य बहिरागच्छतां छात्राणां कृते औद्योगिकदृष्ट्या का व्यवस्था इति। अपि च पाठशालायाम् अध्येतॄणां छात्राणां कृते आङ्ग्लभाषायाः, गणितमन्तर्भाव्य सामान्यविज्ञानम् अपि च सामाजिकाध्ययनम् इत्येते विषयाः अवश्यं पाठनीयाः। संस्कृतशालायाः अथवा कलाशालायाः आगताः छात्राः यं कमपि उद्योगं कर्तुं पारयेयुः यथा अन्ये छात्राः एस्.एस्.एल्.सि अथवा स्नातकपदवीं प्राप्नुवन्ति। अन्तिमरूपेण वक्तव्यं चेत् साम्प्रदायिकव्यवस्थायाः पुनरुज्जीवनस्य लक्ष्यमेव इदमस्ति यत् अध्ययन-अध्यापनपरम्परायाः पुनर्नवीकरणेन नूतनप्रकारकपण्डितस्य अवश्यकता विद्यते।

### १.९. व्यावसायिकशिक्षाया आवश्यकता

व्यावसायिकशिक्षा किञ्चन जीवनसफलीकरणायौद्यौगिकं नैकं क्षेत्रम्। यथा – स्वास्थ्ये ध्यानमस्य वित्तकोषवित्तयोः, सङ्गणकप्रौद्योगिकस्य व्यापारपर्यटनादिसमुपलब्धिविविधपाठ्यक्रमाणाञ्च माध्यमेन छात्रेभ्यः प्रदीयमानङ्कौशलाधारितं प्रशिक्षणम्। छात्रेभ्यः प्रदीयमाना शिक्षा सहायकप्रशिक्षणप्रदाने

आधिक्येन व्यावहारिकप्रदर्शनोपरि ध्यानमाधिक्येन केन्द्रीकृत्यास्मद्राष्ट्रविकासेन सह कुशलजनशक्तिवर्धनस्यावश्यकता वरीवर्ति, शिक्षाऽसौ छात्रानुद्योगाय निर्माति। व्यावसायिकक्षेत्रे सर्वकारीयक्षेत्रे चोभये कुशलश्रमस्य महन्महत्वमेधमानमस्ति। सर्वस्य कुशलव्यावसायिकस्य ( Skilled Professionals) श्रमस्यैधनाय महता दृढेनाभिप्रायस्समुपस्थापितः। तत्सिद्धिकारणं व्यावसायिकशिक्षायां महता वेगेन वृद्धिरभवत्। समयावधौ व्यावसायिकशिक्षायामाधिक्येन विविदास्संलक्ष्यन्ते। पर्यटन-सूचनाप्रौद्यौगिक-वित्तकोषनिमित्तवित्तप्रबन्धनातिथ्य-पारम्परिकशिल्पश्चादिविविधोद्योगेषु कुशलजनस्य महत्त्वमैधत। विभिन्नास्संस्थाः वर्त्तन्ते यत्र यूनामुद्योगाय सिद्धये व्यावसायिकप्रशिक्षणं प्रदीयते। सम्प्रति शिक्षारटनप्रशिक्षणोपरि महताधिक्येन बलं दीयते न तु व्यावहारिककार्योपरि। प्रतिस्पर्धाया वर्धनाय स्वरुच्युसारमुद्योगश्चेतव्यः, व्यावहारिकज्ञानप्राप्तये, तत्सिद्धये चानुमतिः दीयते।

भारते विविधक्षेत्रेषु शिक्षिताः युवकाः, प्राबल्येन स्वाभिप्रायस्य कौशलेन सार्धमसमानतात्वं दृश्यते। कुशलजनशक्तेरस्या महत्यावश्यकतास्ति यत् उद्योगाभिलाषश्च पूर्णताप्राप्तये सारल्याय कल्पयिष्यते।

व्यावसायिकशिक्षया छात्राः उद्योगाभिप्रायपूर्णताप्तये प्रशिक्षिताः भवेयुः। उद्योगस्यावेदनापेक्षाः पूर्णङ्कर्तुं छात्रेभ्यो व्यावसायिकशिक्षाप्राप्तये प्रचोदयात्। भारते छात्राणामुत्तमाङ्कानाङ्कृते छात्रेभ्यः प्रोत्साहनं क्रियते, उत्तममहाविद्यालये प्रवेशः लभ्यते च। यदि वा व्यावसायिकशिक्षणं दद्यान्न दद्याद्वा। छात्रास्स्वहिताय जीवनसफलतायै चाग्रे वर्धनायावसरः लभ्यताम्। तेन सह स्व.वैलीबरमहाशयानुसारेण चिकित्सकः अभियन्ता भवितुं प्रबाधो देयः, तस्मिन्नावश्यकतानुगुणं मानसिकत्वं न भवतु नाम। तादृशः पाठ्यक्रमस्य प्रवेशोऽमुष्य जनस्य भवेत् यः व्यावसायिकप्रशिक्षणं दद्यात् केवलं सैद्धान्तिके भागे ध्यानस्य केन्द्रीकरणं न कुर्यात्। विभिन्नप्रयुक्तविद्याक्षेत्रे कुशलव्यावसायिकस्यानुपस्थितिः न आर्थिकरूपेण महन्मूल्यमभूत्।

केचन छात्राः एकेनाश्चर्यसेटकसरूपेणागच्छेयुर्यदा तेभ्यः प्रशिक्षितत्वेन स्वप्राकृतिककौशलप्रतिभयोश्च साधनायावसरः लालभ्यते। तथैव स्वक्षेत्रे सफलीकृता भवन्ति। तावतः मूल्यस्य सेटकञ्चाप्नुन्ति। सम्यक् कथेयं यत् वैश्विकस्तरे विविधकौशलाय आवेदनानुरोधयश्चैधेते। कदा कदा अङ्कप्रमाणपत्रेषु विभाग: विभागव्यवस्था च (Grade System) विश्वसनीयतां नाप्नोति। अत्यधिकाः छात्राः वस्तुतः उत्तमाः भवेयुः यदा तदीयव्यावहारिककौशलस्य प्रदर्शनायागच्छेत्। एवमवलोक्यते यत् केचन छात्राः विद्यानये उत्तमा न स्युः। किन्तु सुष्ठु कर्मकराः भवन्ति तथा च कुशलव्यावसायिकरूपेण महत्स्थानं लभन्ते।

व्यावसायिकप्रशिक्षणराष्ट्रियशिक्षासम्बन्धप्रयासयोरेकं महत्वपूर्णं तत्वं भवति। राष्ट्रस्य परिवर्त्तने सन्दर्भे व्यावसायिकशिक्षा एवञ्च महत्या प्रभावपूर्णरीत्या स्वभूमिकामात्मसात्करोति तथा च भारतस्य महती जनसंख्यायै अस्य लाभः भवितुं शक्यः, तन्निमित्तं व्यावसायिकशिक्षाप्रशिक्षणयोश्च महत्त्वपूर्णतत्वानां पुनः परिभाषितत्वेनात्यधिकावश्यकतास्ति, यस्मादसौ आधिक्येन सुविधावान्, समकालिकः, प्रासङ्गिकसम्मिलितस्सृजनात्मकश्च भवेत्। सर्वकारः व्यावसायिकशिक्षाया महत्त्वपूर्णभूमिकाया यावच्छक्यमवगतमस्ति, अतः सर्वकारः एतादृशेषु प्रथमतः नैके महत्त्वपूर्णाः प्रयासाः विहिताः। तत्समये भारतविद्यालयाधारितव्यावसायिकशिक्षा एककेन्द्रीयपरिवर्त्तितयोजनायां समन्विता, यस्योपरि 1988 तमे वर्षे विमृश्यते स्म। एवञ्च यस्योद्देश्यमुच्चतरशैक्षिकशिक्षायाः विकल्पप्रदानं करणीयमासीत्। N.I.O.S इत्यस्य व्यावसायिकशिक्षाकार्यक्रमस्य मुख्योद्देश्यम्- अर्थव्यवस्थाविकासाय व्यवस्थिताव्यवस्थितयोः क्षेत्राय कुशलस्य मध्यमवर्गीय-नवशक्तेश्चावश्यकता पूर्णा करणीया। आपणस्यावेदनं तथा च शिक्षार्थिनामावश्यकतानुसारेण व्यावसायिकशिक्षापाठ्यक्रमाणां क्षेत्रं प्राक् वर्षाणामपेक्षया एधमानमस्ति। "N.I.O.S" इत्यस्य सम्प्रति व्यावसायिकशिक्षापाठ्यक्रमः नगरेण ग्रामेण चोभयेन सह सम्बन्धितमस्ति।

## परिशीलितग्रन्थसूचिः

1. संस्कृतसाहित्येतिहासः ।
2. संस्कृतशिक्षानीतिः १९५६-५७ ।
3. Trends in vocational Education and Training Research, Vol.II
4. Academy of Entrepreneurship Journal
5. Education : Vocational Training Dominates Slovene Education Priorities